श्रीमते रामानुजाय नमः

## श्री श्रीवत्सचिह्नमिश्रादिभिरनुगृहीतमिति प्रथितं

# ॥ धाटी पञ्चकं॥

पाषण्ड द्रुमषण्ड दावदहनश्चार्वाक शैलाशनिः
बौद्धध्वान्त निरास वासरपतिर्जैनेभ कण्ठीरवः।
मायावादि भुजङ्गभङ्गगरुडस्त्रैविद्य चूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः॥ 1

पाषण्डषण्ड गिरिखण्डन वज्रदण्डाः
प्रच्छन्न बौद्ध मकरालय मन्थदण्डाः।
वेदान्तसार सुखदर्शन दीपदण्डाः
रामानुजस्य विलसन्ति मुनेस्त्रिदण्डाः॥ 2

चारित्रोद्धारदण्डं चतुरनयपथालङ्क्रियाकेतुदण्डं
सद्विद्या दीपदण्डं सकलकलिकथा सम्हृतेः कालदण्डं।
त्रय्यन्थालम्बदण्डं त्रिभुवन विजयच्छत्र सौवर्णदण्डं
धत्ते रामानुजार्यः प्रतिकथक शिरो वज्रदण्डं त्रिदण्डं॥ 3

त्रय्यामाङ्गल्यसूत्रं त्रियुगपदयुगारोहणालम्बसूत्रं
सद्विद्या दीपसूत्रं सकलकलिकथा सम्हृतेः कालसूत्रं।
प्रज्ञासूत्रं बुधानां प्रशमधनमनः पद्मिनी नालसूत्रं
रक्षासूत्रं मुनीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रं ॥ 4

पाषण्ड सागर महाबडबा मुखाग्निः
श्रीरङ्गराज चरणाम्बुज मूलदासः।
श्रीविष्णुलोक मणिमण्डप मार्गदायी

रामानुजो विजयते यतिराजराजः॥ 5

**॥ इथि धाटी पञ्चकं समाप्तं॥**